# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-२ (SEM-4) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः – साहित्यम् | **CE-248** | समयः - ३ तः ६ |
| दिनाङ्कः – २६/४/२०१६ | सन्दर्भग्रन्थः – वेणीसंहारनाटकम् (४-५-६ अङ्काः) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **द्वयोः श्लोकव्याख्या विधेया ।** | ०८ |
| | (१) दत्वा द्रोणेन पार्थादभयमपि न संरक्षितः सिन्धुराजः,<br>क्रुरं दुःशासनेऽस्मिन् हरिण इव कृतं भीमसेनेन कर्म ।<br>दुःसाध्यामप्यरीणां लघुमिव समरे पूरयित्वा प्रतिज्ञाम्,<br>नाऽहं मन्ये सकायं कुरुकुलविमुखं दैवमेतावताऽपि ॥ (४.२)<br>(२) प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना ।<br>हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतो व्यथा ॥(४.१०)<br>(३) वृषसेनो न ते पुत्रो न मे दुःशासनोऽनुजः ।<br>त्वां बोधयामि किमहं त्वम् मां संस्थापयिष्यसि ॥(४.१४) | |
| **प्रश्नः -२** | **एकस्य सविस्तरमुत्तरं यच्छत ।** | ०८ |
| | (१) सुन्दरक-दुर्योधनयोः संवादं वर्णयत ।<br>(२) कर्णपुत्रवृषसेनस्य पराक्रमं वर्णयत । | |
| **प्रश्नः -३** | **एका टिप्पणी कार्या ।** | ०२ |
| | (१) दुर्योधनः (२) सुन्दरकः (३) सूतः | |
| **प्रश्नः - ४** | **द्वौ प्रश्नौ एकेन वाक्येन समाधेयौ ।** | ०२ |
| | (१) कर्णपुत्रः कः ?<br>(२) चतुर्थाङ्के कति पद्यानि सन्ति ।<br>(३) द्रोणाचार्यस्य सारथिः कः ?<br>(४) “अपि नाम भवेन्मृत्युर्न व हन्ता वृकोदरः” उक्तिरेषा कस्य । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **द्वयोः श्लोकव्याख्या विधेया ।** | ०८ |
| | (१) प्रत्यक्षं हतबान्धवा मम परे हन्तुं न योग्या रहः,<br>किं वा तेन कृतेन तैरिह कृतं यन्न प्रकाश्यं रणे ।<br>एकोऽहं जगतीत्रय क्षयकरो मातः कियन्तोऽरयः,<br>साम्यं केवलयेत्तु देवमधुना निष्पाण्डवा मेदिनी ॥ (५.९)<br>(२) कर्णानिनदुस्मरणात् क्षुभितः शोकसागरः ।<br>वाडवेनेव शिखिना पीयते क्रोधजेन मे ॥(५.१९)<br>(३) अप्रियाणि करोत्येष वाचा रत्सो न कर्मणा ।<br>हतभ्रातृशतो दुःखी प्रमाणैऽस्य का व्यथा ॥(५.३१) | |

| | | |
|---|---|---|
| **प्रश्नः -६** | **सविस्तरमुत्तरं यच्छत ।** | ०८ |
| | (१) पञ्चमाङ्कस्य सारो विवृणुत ।<br>(२) दुर्योधनस्य प्रतिनायकात्मकं विवेचनं कुरुत । | |
| **प्रश्नः -७** | **टिप्पणीद्वयं लिखत ।** | ०४ |
| | (१) सुन्दरकस्य सेवकत्वम् ।<br>(२) (२) कर्णवधः | |
| **प्रश्नः -८** | **पञ्चप्रश्नाः एकेन वाक्येन समाधेयाः ।** | ०५ |
| | (१) मानधनः एव कार्मुकभृत् कः ?<br>(२) चक्रपाणिः कः ?<br>(३) "बालस्य मे प्रकृतिदुर्ललितस्य पापः" अत्र बालः कः ?<br>(४) पञ्चमाङ्के कति पद्यानि ?<br>(५) दुर्योधनशब्दस्य कोऽर्थः ?<br>(६) धृतराष्ट्र शब्दस्य सामासिकविग्रहः कः ?<br>(७) "वाडवेनेव शिखिना पीयते" इति कस्योक्तिः । | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **द्वयोः सप्रसङ्गः व्याख्या कार्या ।** | ०८ |
| | (१) त्रस्तं विनाऽपि विषयादुरुविक्रमस्य<br>चेतो विवेक परिमन्थरतां प्रयाति ।<br>जानामि चोद्यतगदस्य वृकोदरस्य<br>सारं रणेषु भुजयोः परिशक्तितश्च ॥ (६.४)<br>(२) तस्यैव देहरुधिरोक्षितपाटलाङ्गी<br>मादाय संयति गदामपविध्य चापम् ।<br>भ्रातृप्रियेण कृतमद्य पदर्जुनेन<br>श्रेयो ममाऽपि तदेव कृतं जयेन ॥(६.२१)<br>(३) असमाप्तप्रतिज्ञेऽपि याते त्वयि महाभुजे ।<br>मुक्तकेश्यैव दत्तस्ते प्रियया सलिलाञ्जलिः ॥(६.३३) | |
| **प्रश्नः -१०** | **एकस्य विवरणात्मकोत्तरो देयः ।** | ०८ |
| | (१) षष्ठाङ्कस्य सारो विवृणुत ।<br>(२) वेणीसंहारस्य नाटकीयं मूल्याङ्कनं वर्णयत । | |
| **प्रश्नः -११** | **द्वयोः टिप्पणी विधेया ।** | ०४ |
| | (१) धृतराष्ट्र-दुर्योधनसंवादः ।<br>(२) गान्धार्याः सदुपदेशः ।<br>(३) राक्षस-युधिष्ठिरसंवादः ।<br>(४) वेणीसंहारशीर्षकस्यौचित्यम् । | |

| प्रश्नः -१२ | पञ्चानामुत्तरो देयः । | ०५ |
|---|---|---|
| | (१) षष्ठाङ्कप्रवेशकः कः ? | |
| | (२) माद्रीसुतौ कौ ? | |
| | (३) "क्षीरोदधेः सुमथितादिव कालकूटः"उक्तिरेषा कस्य ? | |
| | (४) कञ्चुकी कः ? | |
| | (५) किन्नाम आकाशभाषितम् ? | |
| | (६) षष्ठाङ्के कति श्लोकाः सन्ति ? | |
| | (७) नाटकान्ते कः स्तुतः ? | |

***